# .. Veda Vyasa Ashtottara-shata Namavali 2 ..

# ॥ श्रीवेदव्यासाष्टोत्तरशतनामावलिः २ ॥

ॐ नारायणाय नमः ।
ॐ नराकाराय नमः ।
ॐ तपोभूताय नमः ।
ॐ तपोनिधये नमः ।
ॐ वेदव्यासाय नमः ।
ॐ नीलभासाय नमः ।
ॐ संसारार्णवतारकाय नमः ।
ॐ ज्ञानावताराय नमः ।
ॐ पुरुधिये नमः ।
ॐ शास्त्रयोनये नमः ॥ १०॥
ॐ चिदाकृतये नमः ।
ॐ पराशरात्मजाय नमः ।
ॐ पुण्याय नमः ।
ॐ मुनिवंशशिखामणये नमः ।
ॐ कालीपुत्राय नमः ।
ॐ कलिध्वंसकाय नमः ।
ॐ कानीनाय नमः ।
ॐ करुणार्णवाय नमः ।
ॐ कीटमुक्तिप्रदाय नमः ।
ॐ कृष्णाय नमः ॥ २०॥
ॐ कुरुवंशविवर्धकाय नमः ।
ॐ कुरुक्षेत्रनिजावासाय नमः ।
ॐ हिमाचलकृतालयाय नमः ।
ॐ कमण्डलुधराय नमः ।
ॐ संविन्मुद्राय नमः ।
ॐ अभीतिप्रदायकाय नमः ।
ॐ विशालवक्षसे नमः ।
ॐ शुचिवाससे नमः ।
ॐ कृष्णाजिनविराजिताय नमः ।
ॐ महाललाटविलसत्त्रिपुण्ड्राय नमः ॥ ३०॥
ॐ पद्मलोचनाय नमः ।
ॐ भूतिभूषितसर्वाङ्गाय नमः ।
ॐ रुद्राक्षभरणान्विताय नमः ।
ॐ दण्डपाणये नमः ।
ॐ दीर्घकायाय नमः ।
ॐ जटावलयशोभिताय नमः ।
ॐ महायोगिने नमः ।
ॐ महामतये नमः ।
ॐ भक्तिधाराधराय नमः ।
ॐ विभवे नमः ॥ ४०॥
ॐ वेदोद्धर्त्रे नमः ।
ॐ जितप्राणाय नमः ।
ॐ चिरजीविने नमः ।
ॐ जयप्रदाय नमः ।
ॐ वैशम्पायन-वन्द्याङ्घ्रये नमः ।
ॐ पैलजैमिनिपूजिताय नमः ।
ॐ सुमन्तुशिक्षकाय नमः ।
ॐ सूतपुत्रानुग्रहकारकाय नमः ।
ॐ वेदशाखाविनिर्मात्रे नमः ।
ॐ काण्डत्रयविधायकाय नमः ॥ ५०॥
ॐ वेदान्तपुण्यचरणाय नमः ।
ॐ आम्नायनसुपालकाय नमः ।
ॐ अचिन्त्यरचनाशक्तये नमः ।
ॐ अखण्डैकात्मसंस्थितये नमः ।
ॐ अष्टादशपुराणाब्जसूर्याय नमः ।
ॐ सुरिजनेश्वराय नमः ।
ॐ महाभारतकर्त्रे नमः ।
ॐ ब्रह्मसूत्रप्रणायकाय नमः ।
ॐ द्वैपायनाय नमः ।
ॐ अद्वैतगुरवे नमः ॥ ६०॥
ॐ ज्ञानसूर्याय नमः ।
ॐ सदिष्टदाय नमः ।
ॐ विद्यापतये नमः ।
ॐ श्रुतिपतये नमः ।
ॐ वाक्पतये नमः ।
ॐ नतभूपतये नमः ।
ॐ वेदाङ्गाधिपतये नमः ।
ॐ राष्ट्रपतये नमः ।
ॐ गणपतेः पतये नमः ।
ॐ मात्राज्ञापालकाय नमः ॥ ७०॥
ॐ अमानिने नमः ।
ॐ त्रिकालज्ञाय नमः ।
ॐ अमितद्युतये नमः ।
ॐ धृतराष्ट्र शुक-पाण्डु-विदुरात्म-विभावकाय नमः ।
ॐ धर्मगोप्त्रे नमः ।

ॐ धर्ममूर्तये नमः ।
ॐ कुधर्मपरिहारकाय नमः ।
ॐ प्रतिस्मृत्याख्य-विद्याविदे नमः ।
ॐ पार्थकार्यसहायकाय नमः ।
ॐ युधिष्ठिरप्रतिष्ठात्रे नमः ॥ ८०॥
ॐ जनमेजयचोदकाय नमः ।
ॐ शुकानुशासकाय नमः ।
ॐ श्रीमते नमः ।
ॐ ब्रह्मपुत्र-प्रबोधिताय नमः ।
ॐ देशिकौघ-प्रतिनिधये नमः ।
ॐ दर्शिताद्भुत-वैभवाय नमः ।
ॐ दिव्यदृष्टिप्रदे नमः ।
ॐ कुन्ती-गान्धारी-तापहारकाय नमः ।
ॐ सत्यवतीसुताय नमः ।
ॐ सौम्याय नमः ॥ ९०॥
ॐ सत्यकान्ताय नमः ।
ॐ सदोत्थिताय नमः ।
ॐ सुस्मिताय नमः ।
ॐ संशितव्रताय नमः ।
ॐ श्रुतिमन्थनमन्दराय नमः ।
ॐ सर्वदेवमयाय नमः ।
ॐ सर्वदेवैक्यप्रतिपादकाय नमः ।
ॐ संविद्देवीपदासक्ताय नमः ।
ॐ व्याख्यासिंहासनारूढाय नमः ॥ १००॥
ॐ ज्ञानवैराग्यशेवधये नमः ।
ॐ चराचरजगद्-बन्धवे नमः ।
ॐ शङ्करस्यापि-शङ्कराय नमः ।
ॐ भारतानां परायणाय नमः ।
ॐ भुवनैकगुरोर्गुरवे नमः ।
ॐ ब्रह्मसंविद्-रसघनाय नमः ।
ॐ भागवते नमः ।
ॐ बादरायणाय नमः ॥ १०८॥

Encoded and proofread by
Sunder Hattangadi sunderh@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated August 1, 2012
http://sanskritdocuments.org